वर्षम् - ०२ अङ्कः - ०२
जनवरी-दिसम्बर, २०२०

शोधज्योतिः
ISSN-2350-0700

# श्रीसत्सङ्गिजीवनग्रन्थानुसारेण स्त्रीणां स्वात्रन्त्र्यं शिक्षा च

**साधु लक्ष्मणप्रकाश दासः**[१]

**श्रवणं मङ्गलं यस्य कीर्तनं यस्य मङ्गलम्।**
**स्मरणं मङ्गलं यस्य स हरिर्मङ्गलं क्रियात्॥**

पुण्यभूमिभारते वैदिककाले जनानां विकासस्य मानदण्डः सद्गुणिजीवनम् आसीत्। कालस्य परिवर्तनेन सह समाजस्य लोकजीवनस्य वा परिवर्तनं भवति। साहित्य - संगीत - कलापूर्णजीवनमेव सफलजीवनम् इति भर्तृहरिणा नीतिशतके[२] निर्दिष्टम्। उत्तरोत्तरं तत्सुलभतरं भवेदिति धिया इदानीं सामाजिकविकासस्य आधारोऽस्ति गृहस्त्रियः। सा एवाऽस्ति गृहस्वामिनी। तस्याः सुखसमृद्धिमयजीवनेन सर्वेषां गृहनिवासीनां जीवनं सुखमयं भवेत्।

गृहस्वामिनीनां स्त्रीणां जीवने साहित्यसङ्गीतकलेत्यादय गुणाऽऽगच्छेयुः तदा गृहस्थाश्रमः परिपूर्णो गौरवयुक्तश्च। साहित्यं सङ्गीतं कलेति त्रयं मानवजीवनस्य सम्पूर्णपरिपूर्णतायाः कारणमिति निर्दिष्टम्। एतेषां त्रयाणां सम्पूर्ण विकासस्य आधारमस्ति शिक्षणम्। स्त्री यदि संस्कारिणी शिक्षिता स्यात् तर्हि सम्पूर्णगृहं शोभापूर्णमेवं गृहनिवासिनां सर्वेषां जनानां जीवनं संस्कारपूर्णं च भवेत्। सुखमयसमाजस्य समाजविकासस्य च प्रथमाधारोऽस्ति गृहसंस्कारः। गृहसंस्कारस्य आधारोऽस्ति शिक्षितगृहस्वामिनी। द्विशताब्दीवर्षपूर्वं स्त्रीशिक्षायै भगवता स्वामिनारायणेन भुरिप्रयत्नाः कृताः। तस्योल्लेखः वर्तते सत्सङ्गिजीवननामकग्रन्थे।

पुराणकालीनसन्नार्यः - यमी, सरस्वती, गार्गी, मैत्रैयी, लोपामुद्रा, अनसूया, कौशितकि, पौलोमी, विश्वम्भरा, घोषा, अपाला, अङ्गिरसी, सुनीतिः, कयाध्वादयः ; मध्यकालीनसन्नार्यः - भामती, महाराज्ञी मदालसेत्याद्यनेकाः नार्यः शिक्षणप्रशिक्षणद्वारा नीतिनिपुणा आसन्। परन्तु मध्यकाले विधर्मिणा कृतस्य भारतोपर्याक्रमणस्यानन्तरं, नारीणां स्थितिः अतीव दयनीयतामुपगता। धार्मिकता

---

[१] शोधच्छात्रः १५९, सोमनाथ संस्कृत विश्वविद्यालयः, वेरावल-गुजरात्, श्रीस्वामिनारायण-मन्दिरम्, श्रीस्वामिनारायण-मार्गम्, पो.भुज - कच्छ. गुजरात. ३७०००१

[२] नीतिशतकम् PDF, श्लोक १२, प्र.हरिदास अन्ड कुंपनी - मथुरा १९४८, पे.३४

साम्प्रदायिकता वा इत्यपि नार्युद्धारिका नाभूत्। एवं स्थितौ विक्रमसंवत् १८५८ (1800 AD) तमे वर्षे भगवानस्वामिनारायणः नार्युद्धारकार्यमारब्धवान्।

## नारीस्वातन्त्र्यम्

स्वतन्त्रता तु सर्वेषां प्रियैव। राजकीयशिक्षणप्रणाली आर्थिकदृष्ट्या- ऽऽधुनिकसामाजिकदृष्ट्या कार्यकारिणी स्यान्नाम, किन्तु तत्र स्त्रीणां स्वातन्त्र्यं पुरुषाणामिव दत्तमस्ति परन्तु धार्मिकविभागे स्त्रीस्वातन्त्र्यं कुत्रापि न दृश्यते। भगवता स्वामिनारायणेन स्त्रीभ्यो आत्मसम्माननपूर्वकं धार्मिकस्वतन्त्रता प्रदत्ता प्रथमं लोजपुरनगरात् तत्कार्यं प्रारब्धम्। स्वतन्त्रतासुरक्षायाः प्रारम्भे जाते सति धर्मानुष्ठाने स्वयं नारी शिक्षिता, विदुषी च भवेत्। स्त्रीभिः स्त्रीणां शिक्षणार्थं धर्मसभा समायोजिता। इदमस्ति भगवतः स्वामिनारायणस्य नार्युद्धाराय प्रथमं सोपानम्। अनेन प्रयत्नेन स्त्रीसमाजे शिक्षा विवर्धिता। अयं स्वातन्त्र्येण आगामीनि काले भगवत्स्वामिनारायणः स्वसम्प्रदाये 'स्त्रीणामाचार्या स्त्री एव भवेदिति नियमः प्रस्थापितः साऽपि केवलं स्त्रीभ्यः शास्त्राध्यापनं मन्त्रोपदेशं कर्तुं च शक्नोति। "कृष्णमन्त्रोपदेशश्च कर्तव्यः स्त्रीभ्य एव हि।"[१] तथा च प्रत्येकस्मिन् ग्रामे तासां कृते, ताभिः प्रचलितानि मन्दिराणि प्रतिष्ठापितानि च। एवं नारीभ्यः धार्मिकस्वातन्त्र्यं प्रदत्तम्।

## नारीशिक्षा

नार्युद्धारार्थं प्रथमं शिक्षणमावश्यकम्। शिक्षितव्यक्तिः लोके शास्त्रचक्षुरित्युच्यते। अतः प्रथमं लोजपुरे स्त्रीशिक्षा प्रारब्धा। सत्सङ्गिजीवने द्वितीयप्रकरणे स्वामिनारायणप्रभुः "कार्यः सच्छास्त्राभ्यास आदरात्। स्वस्वबुद्ध्यनुसारेण भवद्भिर्मदुपाश्रायैः"[२] इत्यभ्यासविषयकमादिशति। तेन नारी सुशिक्षिताऽभवदेव। तस्याः बाल्यकाले युवावस्थायां वा शिक्षाग्रहणयोगाऽभावे, स्वगृहे शिक्षणव्यवस्थां कृत्वा "पठनीयाऽधीत विद्या"[३] स्वगृहजनैः शिक्षा देया। किन्त्वशिक्षितस्तु कोऽपि न स्यादिति लक्ष्यम्। तच्छिक्षणं कियत्परिमितं देयं तद्विषये "स्तोत्रादेरथकृष्णस्य पाठः कात्यः स्वशक्तितः।"[४] शुद्धशास्त्रीयभाषायां रचितस्तोत्रादीनामपि स्वयमेव स्वशक्तिः पाठकर्तुं शक्येत तावत् परिमितं शिक्षणमवश्यं ग्रहितव्यम्। भगवतः स्वामिनारायणस्याऽयमादेश आश्रितजनैः अवश्यं पाल्येत। अनेन स्त्रीसमाजे शिक्षणं विवर्धितम्।

---

[१] श्रीसत्सङ्गिजीवनम्, ४/४४/१३३, प्र. श्री स्वामिनारायण मंदिर भुज - कच्छ

[२] श्रीसत्सङ्गिजीवनम्, २/२/२७, प्र. श्री स्वामिनारायण मंदिर भुज - कच्छ

[३] श्रीसत्सङ्गिजीवनम्, ४/४४/३६, प्र. श्री स्वामिनारायण मंदिर भुज - कच्छ

[४] श्रीसत्सङ्गिजीवनम्, ४/४४/५७, प्र. श्री स्वामिनारायण मंदिर भुज - कच्छ

अस्मिन्सन्दर्भे समाजस्य ध्यानाकर्षका जातैका घटना। यदा वडोदरा इति नगरस्य महाराजसयाजीरावसर्वकारः स्वराज्ये 'स्त्रीशिक्षा' विधेया इत्यादिशत्। तमनुसृत्य 'स्त्रीशिक्षणार्थं शिक्षकरूपेण स्त्री एव स्यादि'ति नियमानुसारेण शिक्षिता स्त्री एव शिक्षिका भवेत्। त सर्वेषु विद्यालयेषु शिक्षकरूपेण स्वामिनारायणसम्प्रदायानुयायिनीभिः शिक्षितस्त्रीभिरेव शिक्षणकार्यं कृतमिति प्रसिद्धमेव।

## स्त्रीरक्षा

नारीणां शिक्षया सह रक्षणमपि भवितव्यम्। नारीणां नारीरूपेण रक्षा न भवति चेत् महाननर्थो भवति। तदुक्तमर्जुनेन गीतायाः "स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसङ्करः, सङ्करो नरकायैव कुलघ्नान्नां कुलस्य च।"[१] अतः स्त्रीरक्षाऽऽवश्यकी। किन्तु आधुनिके काले नारीसम्बन्धिनी अवाञ्छिता वा अप्रिया घटना श्रूयते। तथा न भवेत् तदर्थं स्वस्य रक्षा स्वयमेव कर्तव्या तदर्थं शिक्षा एवं सुरक्षा इति उभयं केन्द्रीकृत्य निर्दिशति यत् "विद्याऽनासन्नसम्बन्धात्तभिः पाठ्या नक्वापि नुः।"[२] इति। शिक्षणं अभ्यासं वा निमित्तीकृत्य अधिककालं एवं बहुदिनपर्यन्तं गृहात्बहिः वा परपुरुषेण सह सहवासो भवति। "बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति।"[३], [४] तस्मात् काऽपि अप्रिया घटना भवेत् तथा न स्यात् तदर्थं नारीणां कृते कश्चन सदा परिपालनीयो वर्तनविवेको सूचितः। "बाला युवत्यो विधवा वा सधवा विधवास्तथा स्त्रियः स्वछन्दा नैव स्युः।"[५] तथैव स्वरक्षणार्थं स्ववर्तनकार्यस्य विवेकोऽपि भवेत्। यथा "यस्मिन् परिहितेऽपि स्युर्दृश्यान्यङ्गानि चात्मनः तद्दूष्यं वसनं नैव परिधार्यं मदाश्रितैः।"[६] स्वशरीरे वस्त्रपरिधारणे सत्यप्यात्मीयमङ्गं परिदृश्यते तादृशं (outfit or weaternwear) दूष्यवसनं नैव परिधार्यम्। तथा "नरेक्ष्यनाभ्यूरुकुचऽनुत्तरीया च नो भवेत् न निर्लज्जादिसङ्गिनी।"[७] नारी कदापि स्वस्य नाभ्यूरुवक्षस्थलञ्च अन्यैः प्रत्यक्षीभवेत् तथा न वर्तितव्यम्, तान् सर्वान् सदैव स्ववस्त्रैः आच्छादितव्यमेव। अतः सदा अवश्यं पूर्णरुपेण वस्त्रधारणं कर्तव्यम्। किमर्थमिति चेत् नारीशरीरं सदा मोहकं सुन्दरञ्च अतः सा सुन्दरी इति उच्यते। तस्य सुन्दररूपेण लावण्येन वा कोऽपि जनः सम्मोह्य अनर्थं कुर्यात् चेत् तस्याः एव हानिः सम्भवति।

---

[१] श्रीमद्भगवद्गीता, १/४२, प्र. गीताप्रेस गोरखपुर - संवत् - २०५०

[२] श्रीसत्सङ्गिजीवनम्, ४/४४/१६६, प्र. श्री स्वामिनारायण मंदिर भुज - कच्छ

[३] श्रीसत्सङ्गिजीवनम्, ३/५९/५९, प्र. श्री स्वामिनारायण मंदिर भुज - कच्छ

[४] श्रीमद्भागवतम्, ९/१९/१७, प्र. गीताप्रेस गोरखपुर - संवत् - २०५०

[५] श्रीसत्सङ्गिजीवनम्, २/७/७४, प्र. श्री स्वामिनारायण मंदिर भुज - कच्छ

[६] श्रीसत्सङ्गिजीवनम्, ४/४४/३८, प्र. श्री स्वामिनारायण मंदिर भुज - कच्छ

[७] श्रीसत्सङ्गिजीवनम्, ४/४४/१६६, प्र. श्री स्वामिनारायण मंदिर भुज - कच्छ

सर्वेषाण् जीवने सङ्गस्यापि अतीव प्राधान्यं वर्तते। यथा सङ्गः तथा रङ्गः इति न्यायः। अतः निर्लज्जस्त्रीणां सङ्गं त्याज्यम्। दुष्टविचारयुक्तस्य पापिजनस्य वा सङ्गेन मानवस्य पापकर्मणि रुचिः जायते तदनन्तरं तत्र प्रवृत्तिरपि भवति। अतः अधमस्य सङ्गं त्याज्यम्। भगवानस्वामिनारायणः निर्दिशति यत् भ्रुणहत्याकारिणी नारी अत्यधमा। अतः तादृशीनां नारीणां सङ्गो न कर्तव्यः इति "सङ्गो न गर्भपातिन्याः स्पर्शः कार्यश्च योषितः।"[१] गर्भपातमहापापः। तादृशकर्मकारिणीनां गर्भपातकीनारीणां संसर्गेण स्वस्मिन्नपि पापसंसर्गो पापे प्रवृत्तिर्वा जायते अतः तन्निषिद्धमत्र।

स्त्रीरक्षा इति व्याजेन तस्या अवमानना न कार्या। साऽपि सम्माननीया आदरणीया च। तदर्थं श्रीहरिः निर्दिशति यत् "भार्या च सर्वथा रक्ष्या सर्वोपायैर्गृहस्थितैः। अन्नवस्तेअविभूषाद्यैर्माननीया च नित्यदा"।[२] नारीरक्षा कार्या तथैव अन्नवस्त्राभूषणादिभिः सदा सन्तोषणीया इति।

स्त्रीधर्म सुरक्षितः इति कथनात् स्त्रीणां माध्यमेन समाजस्योन्नतिः विहिता। अतः नारीशक्तिः समाजस्य महान्शक्तिः। सा च यदि सदाचारी सदाविवेकी स्यात् तेन कुटुम्बे, समाजे, ग्रामे, राज्ये, प्रशासने, सर्वत्र सुखमभिवर्धते। तदर्थं श्रीहरि निर्दिशति यत् नारी एकाकिन्येव, पत्युर्वंशस्य पितुर्वंशस्य च सुकीर्तेः आधारो वर्तते। तस्याः पतनेन महाननर्थो जायते। अतः सा सावधानतया "शीलमेव सदा रक्ष्यं ताभिः सन्त्यज्य चापलम्। श्वाशुर्यं च कुलं पित्र्यं लाञ्छनीयं न तु क्वचित्।"[३] मर्यादा वा लज्जा एव नारीणां शोभा सौन्दर्यञ्च। तेनैव नारीरक्षा भवति।

एवं रूपेण भगवता स्वामिनारायणेन समाजे स्त्रीणां स्वात्रन्त्र्यं शिक्षासुरक्षार्थञ्च कृतं लोकोत्तरकार्यं सत्सङ्गिजीवनग्रन्थे उल्लिखितं वर्तते। तस्मात् किञ्चित्स्वमत्यानुसारेण निरूपितमत्रेति॥

---

[१] श्रीसत्सङ्गिजीवनम्, ४/४४/१७०, प्र. श्री स्वामिनारायण मंदिर भुज - कच्छ

[२] श्रीसत्सङ्गिजीवनम्, ५/५/२८, प्र. श्री स्वामिनारायण मंदिर भुज - कच्छ

[३] श्रीसत्सङ्गिजीवनम्, २/७/७७, प्र. श्री स्वामिनारायण मंदिर भुज - कच्छ